# shrIrAmAShTottarashatanAmAvaliH 6

# श्रीरामाष्टोत्तरशतनामावलिः ६

## Document Information

Text title : rAmAShTottarashatanAmAvaliH 6

File name : rAmAShTottarashatanAmAvaliH6.itx

Category : raama, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# श्रीरामाष्टोत्तरशतनामावलिः ६

ॐ सर्वदेवसमाराध्यपदपङ्कजशोभिताय नमः ।
वेदमौलिसमाम्नातपरमानन्दवैभवाय नमः ।
मुनिवृन्दसमाराध्यदिव्यमङ्गलविग्रहाय नमः ।
दिव्यगन्धरसाद्याढ्यपरलोकविराजिताय नमः ।
दिव्यमोहनरूपाढ्यनित्यसूरिनिषेविताय नमः ।
महामणिविचित्राङ्गमण्टपान्तर्विराजिताय नमः ।
श्रीभूमिनीलासंसेव्यपादपीठलसत्पदाय नमः ।
शङ्खचक्रगदापद्मसंशोभितकराम्बुजाय नमः ।
लोकरक्षणसम्प्राप्तविविधाकृतिपूजिताय नमः ।
पौलस्त्यविक्रमप्लुष्टविधिमुख्यसुरस्तुताय नमः ॥ १०

देवाभयप्रदानार्थपरसौलभ्यसागराय नमः ।
वानरीकृतविद्यादिदेवनायकसन्नुताय नमः ।
चक्रवर्तिगृहावासरोचनायुतचेतनाय नमः ।
कौसल्याभक्तिपूर्त्यर्थतद्गर्भवसतिप्रियाय नमः ।
ऋष्यशृङ्गमुनिश्रेष्ठकारितेष्टिफलोद्गमाय नमः ।
यज्ञपावकसञ्जातपायसान्नस्वरूपधृते नमः ।
तत्प्राशनसुसंहृष्टकौसल्यागर्भसम्भवाय नमः ।
चैत्रशुद्धनवम्याढ्यपुनर्वसुविनिर्गताय नमः ।
रामाजनसमाह्लादशङ्खचक्रादिशोभिताय नमः ।
रामनामविराजच्छ्रीभक्तसङ्घकृतार्हणाय नमः ॥ २०

भरतादिमहोदारभ्रातृमध्यविराजिताय नमः ।
वयस्यकेलिसञ्जातसुन्दरस्वेदभूषिताय नमः ।
कस्तूरीतिलकोद्भासिचूर्णकुन्तलराजिमते नमः ।
राकाचन्द्रनिभश्रीमद्वदनाम्बुजशोभिताय नमः ।
विकासोन्मुखपद्मश्रीमन्दहासातिसुन्दराय नमः ।

प्रियभाषणसंसक्तभक्तसङ्घविराजिताय नमः ।
राजलक्षणमाधुर्यसन्तोषितमहीपतये नमः ।
विश्वामित्रानुगश्रीमल्लक्ष्मणानुचराद्दताय नमः ।
ताटकाख्यमहामृत्युभयविध्वंसकारकाय नमः ।
यज्ञप्रत्यूहकृद्रक्षोविक्षोभणकृताभयाय नमः ॥ ३०

कुशिकात्मजसम्प्रोक्ततुषाराद्रिसुताकथाय नमः ।
गौतमाख्यमुनिश्रेष्ठवनितापापभञ्जकाय नमः ।
चन्द्रशेखरकोदण्डभञ्जनात्तमहोन्नतये नमः ।
जानकीहस्तसन्दत्तहारशोभिभुजान्तराय नमः ।
वधुयुक्तसहोदर्यवन्दिताङ्घ्रिसरोरुहाय नमः ।
भार्गवास्त्रगृहीतश्रीसन्तोषितमहीपतये नमः ।
वसिष्ठादिमुनिप्रीतजननीजनपूजिताय नमः ।
जानकीमानसोल्लासकुमुदोद्भासिचन्द्रमसे नमः ।
ज्ञानवृद्धवयोवृद्धशीलवृद्धसुसम्मताय नमः ।
माधुर्याढ्यमहौदार्यगुणलुब्धमहीप्रियाय नमः ॥ ४०

महागजसमारूढदर्शनेच्छुजनावृताय नमः ।
कैकेयीवाक्यसन्तप्तमहीपतिसमीपगाय नमः ।
अनायासगृहीतस्ववनवासविराजिताय नमः ।
मुनिरक्षात्वरात्यक्तजनन्यादिजनार्थनाय नमः ।
सीतासौमित्रिसंसेव्यरथोत्तमविराजिताय नमः ।
गुहानीतवटक्षीरधृतकेशजटाततये नमः ।
गङ्गातीरपरित्यक्तखिन्नसारथिमित्रवते नमः ।
भरद्वाजमुनिप्रोक्तचित्रकूटनिवासकृते नमः ।
मृततातसुसंस्कारक्षणागतसहोदराय नमः ।
बहुन्यायसमाख्यानवितीर्णनिजपादुकाय नमः ॥ ५०

वसिष्ठादिमहीदेवदेवनाथादिपूजिताय नमः ।
खरभीतमुनिव्रातसूचितात्मव्यवस्थितये नमः ।
शरभङ्गमहायोगिनित्यलोकप्रदायकाय नमः ।
अगस्त्यादिमहामौनिपूजिताङ्घ्रिसरोरुहाय नमः ।
राक्षसार्तमुनिश्रेष्ठसंरक्षणकृताभयाय नमः ।
विराधवधसन्तुष्टदेहिवृन्दनिषेविताय नमः ।

गृध्रराजमहाप्रीतिस्थितपञ्चवटीतटाय नमः ।
कामार्तराक्षसीकर्णनासिकाच्छेदनादराय नमः ।
खरकोपविनिष्क्रान्तखरमुख्यनिषूदनाय नमः ।
मायामृगतनुच्छन्नमारीचतनुदारणाय नमः ॥ ६०

सीतावचनसङ्खिन्नसौमित्रिभृशकोपनाय नमः ।
शुन्योटजसमालोकव्यथिताशयभिन्नधिये नमः ।
वृत्तबोधिजटाय्वर्थदत्तलोकमहोन्नतये नमः ।
मुत्ताशापकबन्धोक्तजानकीप्राप्तिनिश्चयाय नमः ।
शबरीचिरकालाप्ततद्भुक्तफलसंस्पृहाय नमः ।
भिक्षुरूपप्रतिच्छन्नहनुमद्वचनादराय नमः ।
स्निग्धसुग्रीवविस्रम्भदत्तवीर्यपरीक्षणाय नमः ।
विद्धवालिसमाख्यातशास्त्रसारविनिर्णयाय नमः ।
वर्षर्तुसर्वसमयगिरिप्रस्रवणस्थिताय नमः ।
विस्मृताखिलसुग्रीवप्रेषितात्मसहोदराय नमः ॥ ७०

नतसुग्रीवसन्दिष्टहनुमद्दत्तभूषणाय नमः ।
प्राप्तचूडामणिप्रेक्षासंस्मारितगुरुत्रयाय नमः ।
वायुसूनुवितीर्णस्वशरीरालिङ्गनोज्ज्वलाय नमः ।
कपिसैन्यमहोत्साहप्राप्तनीरधिसत्तटाय नमः ।
विभीषणपरित्राणप्रथितात्ममहाव्रताय नमः ।
महोदधिमहावेगजातक्रोधातिभीषणाय नमः ।
शरार्तवार्धिरत्नौघपूजिताब्जपदद्वयाय नमः ।
कार्यप्रकत्यूहविध्वंससम्पूजितमहेश्वराय नमः ।
महासेतुमहादेवविधिमुख्यसुरार्चिताय नमः ।
वालिसूनुदशग्रीवसमाश्रावितताद्धिताय नमः ॥ ८०

समागतघटीकर्णमुखराक्षससूदनाय नमः ।
दशग्रीवशिरोराजत्किरीटाग्र्यविभेदकाय नमः
इन्द्रजिद्वधकार्याप्तसुमित्रासुतवन्दिताय नमः ।
राक्षसाधिपविध्वंसदेवसङ्घकृतस्तुतये नमः ।
वह्निप्रवेशदीप्ताङ्गजानकीप्रीतमानसाय नमः ।
चक्रवर्तिमहेशानविधिमुरव्यस्तुतोन्नतये नमः ।
अभिषिक्तसमायातविभीषणकृतस्तुताय नमः ।

निजपादाब्जसंसक्तरक्षोवैभवशंसनाय नमः ।
यूथनायकतत्पत्नीविभीषणपरीवृताय नमः ।
पुष्पकागतिसुप्रीतभरद्वाजकृतार्चनाय नमः ॥ ९०

भरतानन्दसन्दोहवर्धनादृतमारुतये नमः ।
महासाम्राज्यलब्धश्रीनन्दिताखिलचेतनाय नमः ।
काशीक्षेत्रमहेशानचिन्तितात्ममहामनवे नमः ।
मृतौ तद्दत्ततन्मन्त्रलब्धमुक्तिपदस्तुताय नमः ।
श्रीरामतापिनीप्रोक्तविश्रुतानन्तवैभवाय नमः ।
मकाराक्षरसञ्जातशिवांशहनुमत्प्रियाय नमः ।
निजचारित्रसम्भूतवाल्मीकिवरदायकाय नमः ।
नामवैभवलेशांशविध्वंसितविपत्ततये नमः ।
चेतनासेचनानन्दनिजवैभवभूषिताय नमः ।
अविशेषवितीर्णार्तरक्षणोत्थमहोन्नतये नमः ॥ १००

महेशविदितानन्दनिजवैभवभूषिताय नमः ।
लक्ष्मीविष्ण्वंशसम्पूर्णसीतारामशरीरवते नमः ।
विष्णुशभुमहामन्त्रसाराक्षरसुनामवते नमः ।
मित्रभावसमायातभक्तरक्षैकदीक्षिताय नमः ।
सकृत्प्रपन्नजनतासंरक्षणधुरन्धराय नमः ।
श्रितचित्तपरानन्ददायिमङ्गलविग्रहाय नमः ।
धर्मार्थकाममोक्षाख्यफलसर्वार्थदायकाय नमः ।
भक्तेष्टफलदानोत्ककरुणासान्द्रचेतसे नमः ॥ १०८

इति श्रीरामाष्टोत्तरशतनामावलिः ६ समाप्ता ।

Proofread by PSA Easwaran

*shrIrAmAShTottarashatanAmAvaliH 6*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*